# Shri Mahalinga Stuti

# श्रीमहालिङ्गस्तुतिः

## Document Information

Text title : Mahalingastuti or Mahalingashtakam

File name : mahAlingastutiH.itx

Category : shiva, aShTaka

Location : doc_shiva

Description/comments : kUrmapurANa

Latest update : July 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# श्रीमहालिङ्गस्तुतिः

अनादिमलसंसार रोगवैद्याय शम्भवे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ १॥

आदिमध्यान्तहीनाय स्वभावानलदीप्तये ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ २॥

प्रलयार्णवसंस्थाय प्रलयोत्पत्तिहेतवे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ ३॥

ज्वालामालावृताङ्गाय ज्वलनस्तम्भरूपिणे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ ४॥

महादेवाय महते ज्योतिषेऽनन्ततेजसे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ ५॥

प्रधानपुरुषेशाय व्योमरूपाय वेधसे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ ६॥

निर्विकाराय नित्याय सत्यायामलतेजसे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ ७॥

वेदान्तसाररूपाय कालरूपाय धीमते ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥ ८॥

इति श्रीकूर्मपुराणान्तर्गतं श्रीमहालिङ्गस्तुतिः समाप्ता ।

*Shri Mahalinga Stuti*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*